# Shri Bhramaramba Ashtakam 2

# श्रीभ्रमराम्बाष्टकम् २

## Document Information

Text title : Bhramaramba Ashtakam 2

File name : bhramarAMbAShTakam2.itx

Category : devii, aShTaka, otherforms, devI

Location : doc_devii

Latest update : July 7, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 22, 2023

*sanskritdocuments.org*

# श्रीभ्रमराम्बाष्टकम् २

श्रीकण्ठार्पितपत्रगण्डयुगलां सिंहासनाध्यासिनीं
    लोकानुग्रहकारिणीं गुणवतीं लोकेक्षणां शाङ्करीम् ।
पाकाल प्रमुखामुरार्चितपदां मत्तेभकुम्भस्तनं
    श्रीशैल भ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥ १॥

विन्ध्यादीन्द्रगृहान्तरेनिवसितां वेदान्तवेद्यां निधिं
    मन्दारद्रुमपुष्पवासितकुचां मायाम्महामायिनीम् ।
बन्धूकप्रसवोज्ज्वलारुणरखां पञ्चाक्षरीरूपिणीं
    श्रीशैल भ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥ २॥

म्याच्छम्भनिशुम्भमेघपटलप्रध्वंस झञ्झानिलां
    कौमारीम्महिषाख्य शुष्कविटपी धूमोरुदावानलाम् ।
चक्राद्यायुधसङ्ग्रहोज्ज्वलकराञ्चामुण्डिकाधीश्वरीं
    श्रीशैल भ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥ २॥

दृक्यन्त विलासलल्पित सरोजातोरु शोभान्वितां
    नक्षत्रेश्वर शेखर प्रियतमां देवीं जगन्मोहिनीम् ।
रेञ्ञर्मङ्गल दायिनीं शुभकरीं राजत्स्वरूपोज्ज्वलां
    श्रीशैल भ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥ ३॥

केलीमन्दिर राजताचलतलां सम्पूर्ण चन्द्राननां
    योगिञ्छैरुतपादपञ्ञयुगां रत्नाम्बरालङ्कृताम् ।
स्वर्गावास सरोजपत्र नयनाभीष्टप्रदां निर्मलां
    श्रीशैल भ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥ ४॥

संसारार्णव तारकां भगवतीं दारिद्र्य विध्वंसिनीं
    सन्ध्याताण्डव केलिकां प्रियसतीं सद्वृत्त कामप्रदाम् ।
ॐ जन्नूपुरपादपङ्कजयुगां बिम्बाधरां श्यामलां
    श्रीशैल भ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥ ५॥

चञ्चत्काञ्चन रत्नचारु कटकां सर्वँसहावल्लभां
काञ्ची काञ्चन घण्टिका घणघणं कञ्चित पतेक्षणम् ।
आर्तत्राणपरायं पुरहरप्राणेश्वरीं शाम्भवीं
श्रीशैल भ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥ ६॥

स्वर्णोकेश्वरवन्द्य पादकमलां पङ्केरुहाक्षसुतां
प्रालेयाचलवंशपावनकरींशृङ्गारभूषानिधिम् ।
तत्त्वातीत महाप्रभां विजयिनीं दाक्षायिणीं भैरवीं
श्रीशैल भ्रमराम्बिकां भज मनः श्रीशारदासेविताम् ॥ ७॥

भ्रमराम्बा महादेव्याष्टकं सर्वसिद्धिदम् ।
नराणां सर्वशत्रूणां ध्वंसनं तद्वदाम्यहम् ॥ ८॥

इति श्रीदूर्वासविरचितं श्रीभ्रमराम्बाष्टकं सम्पूर्णम् ।

*Shri Bhramaramba Ashtakam 2*

pdf was typeset on July 22, 2023

Please send corrections to *sanskrit@cheerful.com*